काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवो ह्यतिबाहुश्च शुचिराङ्गिरसस्तथा । शुक्रश्चैव तथात्रेयः शुक्रो वासिष्ठ एव च । अजितः पौलहश्चैव अन्त्याः सप्तर्षयोमताः” हरिवं०७अ० । तथा च मन्वन्तरभेदे सप्तर्षिमध्ये अत्रिपुत्रा सत्यनेत्रादयः । वैवस्वते तु मन्वन्तरे दत्तः दुर्वासाः सोमश्चेति त्रय आत्रेयाः प्रसिद्धाः । ते च ब्रह्मेशाच्युतांशजाः तथोक्तम्” भाग० ४स्क० १अध्या० । ‘अत्रेःपत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् । दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् । श्रीविदूरउवाच । अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः । किञ्चिच्चिकीर्षवोजाता एतदाख्याहि मे गुरो । श्रीमैत्रेयउवाच । ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदांवरः । सह पत्न्या ययावृक्षं कुलाद्रिं तपसिस्थितः । तस्मिन् प्रसून स्तवकपलाशाशोककानने । वार्भिः स्रवद्भिरुद्घुष्टे निर्व्विन्ध्यायाः समन्ततः । प्राणायामेन संयम्य मनो वर्ष शतं मुनिः । अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः । शरणं तं प्रपद्येऽहं य एव जगदीश्वरः । प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् । तप्यमानम् त्रिभुवनम् प्राणायामैधसाग्निना । निर्गतेन मुनेर्मूर्द्ध्नः समीक्ष्य प्रभवस्त्रयः । अप्सरोमुनिगन्धर्व्वसिद्धविद्याधरोरगैः । वितायमानयशसस्तदाश्रमपदं ययुः । तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः । उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् । प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः । वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैः सुचिह्नितान् । कृपावलोकेन हसद्वदनेनोपलम्भितान् । तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी । चेतस्तत्प्रवणं युञ्जन्नस्तावीत् संहताञ्जलिः । श्लक्ष्णया सूक्तया वाचा सर्व्वलोकगरीयसः । अत्रिरुवाच । विश्वोद्भवस्थितिलयेषु विभज्यमानैर्म्मायागुणैरनुयुगं विगृहीतदेहाः । ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहम् वस्तेभ्यः कएव भवतां म इहोपहूतः । एकोमयेह भगवान् विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयोमे । श्रीमैत्रेयउवाच । इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः । प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ! । श्रीदेवाऊचुः । यथा कृतस्ते संकल्पोभाव्यस्तेनैव नान्यथा । स ते सङ्कल्पस्ते ब्रह्मन् यद्वै ध्यायति ते वयम् । अथास्मदंशभूतास्ते आत्मजालोक विश्रुताः । भवितारोऽङ्ग भद्रन्ते विस्रप्स्यन्ति च ते यशः । एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः । सभाजितास्तयोः सम्यग्दम्पत्योर्मिषतोस्ततः । सोमोऽभूद्ब्रह्मणोऽंशेन दत्तोविष्णोस्तु योगवित् । दुर्व्वासाः शङ्करस्यांशोनिबोधाङ्गिरसः प्रजाः” । आत्रेयश्च शुक्लयजुः सम्प्रदायप्रवर्त्तकः वंशगणनायाम् “भरद्वाज आत्रेयात् आत्रेयोमाण्टेः” शत०ब्रा० पठितः स्त्रियां ङीप् । “आत्रेय्यस्मि” उत्तरच० शुक्लयजुषां सम्प्रदायप्रवर्त्तक वंशगणनायाम् “आत्रेयीपुत्रादात्रेयीपुत्र इति” शत० ब्रा० । “पुत्रमन्थनकर्मणः स्त्रीसंस्काराङ्गत्वेनोक्तत्वात् तत्सन्निधानादयं वंशः स्त्रीप्राधान्येनोच्यते” भा० । २अत्रिगोत्रमध्ये श्रेष्ठे पु० । “आत्रेयाय चाग्नीध्रवत्सदसःपुरस्तादुपविष्टाय क आत्रेयं क आत्रेयमिति त्रिरुक्त्वा”कात्या०१०,२,२१ । “आत्रेयाय अत्रिसगोत्राय अत्रिप्रवराय”वा कर्कः “आत्रेयाय हिरण्यं ददाति” शत०ब्रा० । बह्वृषु ढकोलुक् अत्रयः अत्रिपुत्रेषु कश्चिन्न । “आगस्त्याश्च महाभागा आत्रेयाश्चोत्तमव्रताः । सर्वस्य जगतः श्रेष्ठाः पूजिता ब्राह्मणास्तथा” भा० व० २१ अ० । तेषां श्रेष्ठत्वं च यज्ञे अनिन्त्विग्भ्योऽपि तेभ्यो दक्षिणादानस्य” शत० ब्रा० उक्तेः यथा “आत्रेयाय हिरण्यं ददातीत्युपक्रम्य “अत्रिर्वा ऋषीणां होतासावैतत् स दोऽसुरतमसमभिपुप्रुवे त ऋषयोऽत्रिमब्रुवन्ने हि प्रत्यङ् इदं तमोऽपजहीति स एतत्तमोऽपाहन्नयं वै ज्योतिर्य इदं तमोऽपावधीदिति तस्मा एतद्दक्षिणामनयन् ज्योतिर्हिरण्यं तद्वै स तत्तेजसा वीर्य्येणर्षिस्तमोऽपजघानाथैष एतेनैवैतज्ज्योतिषा तमोऽपहन्ति तस्मादात्रेयाय हिरण्यं ददातीति” । अत्रिप्रशंसया च तद्वंशजानां प्रशंसा । सचान्त्विगेव ‘आत्रेयाय चाग्नीध्रवदित्यनन्तरम् “ऋत्विग्भ्यो दक्षिणां ददातीति कात्या० सूत्रे” ऋत्विक्त्वविशेषणात् तत्पूर्वस्य अन्त्विक्त्वमिति”कर्कः । ३देहस्थरसभेदे”हेम० ४नदीभेदे स्त्री“करतोया तथात्रेयी लौहित्यश्च महानद” भा०स०प०९अ०वर्णिता । “आत्रेयीं वक्ष्यामो रजस्वलामृतुस्नातामात्रेयीमाहुः अत्रेत्येयामपत्यं भवतीत्यात्रेयीमिति” वशिष्ठोक्तनिर्वचनयुक्तायामृतुस्नातायां ५स्त्रियां स्त्री “हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् । राजन्यवैश्यावीजानावात्रेयीमेव च स्त्रियम्”मनुः “आहिताग्नेर्ब्राह्मणस्य हत्वा पत्नीमनिर्निन्दिताम् । ब्रह्महत्याव्रतं कुर्य्यादात्रेयीघ्नस्तथैव च” अङ्गि०। ‘यागस्थक्षत्रविड्घाती चरेद्ब्रह्म-